# Shri Sadashiva Stotram

# શ્રીસદાશિવસ્તોત્રમ્

## Document Information

Text title : Shri Sadashiva Stotram 1

File name : sadAshivastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : NA, Sunder Hattangadi

Latest update : August 11, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીસદાશિવસ્તોત્રમ્

પઙ્કજોદ્ભવ પ્રપૂજિતાઙ્ઘ્રિ પઙ્કજદ્વયં
કિઙ્કરિકૃતમરોગમપ્રમેયમવ્યયમ્ ।
સઙ્કટાપહં સમસ્તલોકપાલનોત્સુકં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૧॥

આગમાન્તચારિણં નિકૃતમતવારણં
વાગતીતમદ્વયં વિરાજવાહનપ્રિયમ્ ।
નાગભૂષણં કુરઙ્ગધારિણં વિરાગિનં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૨॥

ભાલનેત્રદગ્ધમન્મથ પ્રમુગ્ધવિગ્રહં
ભાલસ્થિતે ભાનુમૌલિમાદ્રિરાજસાયકમ્ ।
નીલલોહિતં નિશીધિનીશ નિર્મલાઙ્ગકં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૩॥

પાદયુગ્મસાર સાશ્રિતદ્વયપાદપં
નાદરૂપમદ્રિજા ઘનસ્તનપ્રમર્દિનમ્ ।
વેદવેદ્યમાદિદેવમુગ્રમુક્શવાહનં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૪॥

દેવનિમ્નગા તરઙ્ગ શીખરોલ્લસજ્જટં
ભાવનાવિધૂરગં કપાલિનં પિનાકિનમ્ ।
પાવનં પુરાતનં પુરાત્રયપ્રભઞ્જનમ્
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૫॥

શીતલચલાત્મજ હૃદમ્બુજ ભાસ્કરં
વીતરાગ યોગિવૃન્દ ચિદારઙ્ગનર્તકમ્ ।
સારગં સનાતનં સમાધિકં સદાનતં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૬॥

રામનામમન્ત્ર તત્ત્વચિન્તનૈકચેતસાં
કામનાશનં કૃષાણુ લોચનં નિરઞ્જનમ્ ।
વ્યોમકેશમીશ્વરં ભવમ્ભવાબ્ધિ તારકં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૭॥

બન્ધહીન લોકબન્ધુ મન્દકાન્તકં
સિન્દુરાસ્ય બાહુલેય લાલનલોલુપમ્ ।
દણ્ડિચર્મચેલમીહિતાર્થધં  સુખાસ્પદં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૮॥

સત્યચિદ્ઘનં વિકલ્પહીનમક્શયં પરં
નિત્યમીશ્વરં કૃશાણુરેતસં નિરાગસમ્ ।
મૃત્યુભીતિભેદકં મૃગેન્દુપુત્રપાલકં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૯॥

વિષ્ટપોદ્ભવસ્થિતિ પ્રનાશકારણં શિવં
દુષ્ટદૈત્યસૂદનં કપાલશૂલધારણમ્ ।
શિષ્ટપાલનં ગિરીશમષ્ટમૂર્તિમન્વહં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૧૦॥

ભૂતનાયકં વિભૂતિભૂષણં વિષાશિનં
પાથગૌકનાશનં પવિત્રમસ્થિમાલિનમ્ ।
જાટરૂપકાન્તિકામ્યકેશપાશશોભિનં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૧૧॥

તારકેશ શેખરં તમાલનીલ કન્ધરં
તારકસ્વરૂપકં ત્રિવર્ગસિદ્ધિદાયકમ્ ।
તારકારિ તોષણૈક તત્પરં દિગમ્બરં
ચિન્તયામહે સદાશિવં શિવાર્ધવિગ્રહમ્ ॥ ૧૨॥

સ્તોત્રમેતદુત્તમં સમસ્તસૂરિભાવિતં
ગોત્રનન્દિનીપતિ પ્રિયઙ્કરં શિવઙ્કરમ્ ।
શ્રોત્રસૌખ્યહેતુકં મુદા સદાપિ યઃ પઠેદ્-
સાર્દ્રયા સુગીત પૂતમચ્યુતં પદં લભેત્ ॥ ૧૩॥

ઇતિ શ્રીસદાશિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by NA, Sunder Hattangadi

*Shri Sadashiva Stotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*